श्रीगणेशायनमः ॥ अथसांकल्पहेमश्राद्धप्रयोगोलिख्यते तत्रकर्तामध्याह्नात्पूर्वमुपक्रमादिपुण्यकालेवाआचम्यपवित्रपाणिः प्राणानायम्य देशकालौसंकीर्त्यश्रीपरमेश्वरप्रीत्यर्थंपितृसंबंधिनामगोत्रसहितानुद्दिश्यतत्प्रत्यर्थंअमुकनिमित्तंसदैवंहेमश्राद्धंसांकल्पविधिनासद्यःकरिष्ये तदंगंतिलोदकंयवोदकंचकृत्वा समस्तसंपदितिविप्रान्प्रदक्षिणीकृत्यप्रणम्य क्षणपाद्यासनगंधपुष्पधूपदीपाछादनानंदेवपितृपूजनंअर्घ्यावाहनरहितंकृत्वा विप्रान्नेसाधारंहेमनिधायदेवविप्रसंनिधायुपविश्यहिरण्यंगायत्र्याभोक्ष्यन्नंपरिषिच्य पुरुषंवादेवसंज्ञकेभ्योविप्रेभ्योदेवेभ्यःदूरंएकब्राह्मणभोजनपर्याप्तान्नानिव्यादनसमर्थंहेमअमृतरूपेणस्वाहासंपद्यतांहव्यंनमसेतिपयोदकमुत्सृजेत् ॥ एवंदूरंतततोयेदेवासोउपस्थाय पितृब्राह्मणसमीपेउपविश्यहिरण्यंपरिषिच्यअस्मत्पित्रेअमुकशर्मणेअमुकगोत्रायवसुरूपायसपत्नीकायद्दएकब्राह्मणभोजनसमर्थंहेमअमृतरूपेणस्वधासंपद्यतांकव्यंनमसेतितिलोदकमुत्सृजेत् एवंपितामहादीनामपितः ततः एकेमहा

हेत्युपस्थापस्थाय ब्रह्मार्पणं तु ईशानविष्णु एकोविष्णु अनेन हिरण्यश्राद्धे हिरण्य ग्रहणेनपित्रादिस्वरूपजनार्दनवासुदेवः प्रीयतां तदोमधुमतीअसंनमामदंतेतिश्रावयित्वा शिवाआपः संत्वित्यादिनंधारयतविप्रोदक्षिणं दद्यात् ततश्राद्धकर्ता जनार्दनवासुदेवः प्रीयतां ॥ तदानीमेवश्राद्धीयतर्पणंकुर्यात् ॥ इतिसमाप्तः ॥ आमश्राद्धमध्येवमेव ॥ विशेषस्तु हेमश्राद्धस्थानेआमश्राद्धप्रयोगः ॥ श्राद्धांगतर्पणंपूर्वमेवकार्यं ॥ नित्यतर्पणश्राद्धात्पूर्वंविघ्ननिमंत्रणोत्तरंकृतचेन्नहानेनैवश्राद्धांगतर्पणस्यमंत्रेणप्रसंगेनयासिद्धिरितिकेचित् ॥ इतिसांकल्पआमहेमश्राद्धप्रयोगः ॥ ॥